**संस्कृतवार्ता:**

**दिनाङ्क :-22.10.2024**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री - रूसदेशः**

**प्रधानमन्त्री नरेन्द्रमोदी षोडशे ब्राजील-रूस-भारत-चीन-दक्षिण अफ्रीकादेशानां ब्रिक्सइति शिखरसम्मेलने सहभागार्थम् अद्यारभ्य रूसदेशं प्रति प्रस्थास्यति। अत्रावधौ श्रीमोदी ब्रिक्स समूहस्य सदस्यदेशैः नेतृभिस्साकं द्विपक्षीयोपवेशनानि समनुष्ठास्यति। विदेशमन्त्रालयेन कथितं यत् प्रधानमन्त्री श्रीमोदी रूसदेशस्य राष्ट्रपतेः व्लादिमीर-पुतिनइत्यस्य निमन्त्रणे द्वाविंशति-त्रयोविंशति-दिनाङ्कयोः रूसदेशस्य यात्रायां भविष्यति इति। कजाननगरे समायोक्ष्यमाणस्य अस्य शिखरसम्मेलनस्य विषयो वर्तते-वैश्विक विकाससुरक्षयोः कृते बहुपक्षवादस्य सुदृढीकरणमिति।**

**नवदिल्ल्यां वार्ताहरान् संसूचयन् विदेशसचिव: विक्रम-मिस्री इत्येष: प्रोक्तवान् यत् भारतं ब्रिक्ससमूहस्य संस्थापकसदस्योऽपि विद्यते। ब्रिक्ससमूह: वैश्विक-समाह्वनानि समापयितुं महत्वपूर्णमञ्चत्वेनापि कार्यं करोतीति। असौ अग्रे ख्यापितवान् यत् द्विदिवसात्मके अस्मिन् शिखरसम्मेलने आर्थिकसहयोग: खाद्योर्जा सुरक्षा स्वास्थ्यं सेवा: च सम्वर्धयिष्यन्ति। शिखरसम्मेलनावधौ श्रीमोदी केषुचित् द्विपक्षीयोपवेशनेषु भागं ग्रहीष्यति इत्यपि कथिता विदेशसचिवेन।**

**जल-पुरस्कार:**

**राष्ट्रपतिः द्रौपदीमुर्मुः अद्य नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य पञ्चमं राष्ट्रीय-जल-पुरस्कारं प्रदास्यति। केन्द्रीयजलशक्तिमन्त्रालयेन सर्वश्रेष्ठराज्यं, सर्वश्रेष्ठ-जनपदं, सर्वश्रेष्ठग्राम पञ्चायत्, सर्वश्रेष्ठ-नगरीय-स्थानीय-संस्था, सर्वश्रेष्ठ जल-उपयोक्तृ-संघ, सर्वश्रेष्ठ-नागरिक-समाजं च समेत्य नव-श्रेणिषु अष्टात्रिंशत्**

विजेतारः घोषिताः। सर्वोत्तम-राज्यस्य-वर्गे ओडिशा-राज्यं प्रथम पुरस्कारम् उत्तरप्रदेश-राज्यं द्वितीय-स्थानं गुजरात-पुदुचेरी-राज्ये संयुक्तरूपेण तृतीस्थानं च प्राप्तवन्त:। प्रत्येकं पुरस्कारविजेता प्रशंसापत्रं, परितोषिकं तथा च कतिपयेषु वर्गेषु धनपुरस्कारान् प्राप्स्यति।

<u>भारत-लद्दाखक्षेत्र</u>

भारत-चीनदेशौ पूर्वीय-लद्दाख-क्षेत्रे वास्तविक-नियन्त्रण-रेखायां रक्षा व्यवस्थाम् आधृत्य सहमतौ जातौ। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशसचिवः विक्रम-मिस्रीइत्येषः सूचितवान् यत् अनया सहमत्या द्वाविंशत्यधिक द्विसहस्रतमवर्षे जातां चिन्तां न्यूनीकर्तुं तस्याःच समाधानम् अन्वेष्टुं साहाय्यं मेलिष्यति।

असौ अग्रे अवोचत् यत् उभयो: पक्षयो: मध्ये विस्तारपराया: चर्चाया: अनन्तरं प्रहरीव्यवस्थायां सहमति: जाता। विदेशमन्त्री डॉ. एस्. जयशङ्कर: अस्या: सहमत्या: प्रशंसां कृतवान्। उक्तवान् च यत् उभौ देशौ विंशत्यधिक-द्विसहस्रतमवर्षस्य स्थितिं पुनरावर्तितवन्तौ। अपि च एषा एक साकारात्मकी प्रगति: धैर्य-दृढ-कूटनीत्यो: परिणाम: अपि अस्तीति।

<u>दाना चक्रवातः</u>

गुरु-शुक्रवासरयोः अर्धरात्रौ पुरी-सागर-द्वीपयोर्मध्ये भीषणातिभीषणं दाना इति चक्रवातः वर्धमानो भविष्यति इति सम्भाव्यते। चक्रवातावधौ वायुगतिः विंशत्यधिकैकशतकिलोमीटरमितां प्रति होरा भविष्यति। भारत-ऋतु- विज्ञान-विभागेन ख्यापितं यत् बङ्गाल खातेः मध्ये निर्मितम् अल्पभार- युतं क्षेत्रं पश्चिमोत्तर-पश्चिमीयभागं प्रति संवर्धयिष्यति। अनेन विभागेन बुधवासरतः शुक्रवासरं यावत् ओडिशाराज्यस्य विविधेषु तटीयजनपदेषु निम्नवर्तिषु क्षेत्रेषु च अत्यधिकवृष्टेः भविष्यवाणी कृता। धीवरेभ्यः च प्रत्यागमनाय आदेशः प्रदत्तः। तत्रैव राजधान्यां भुवनेश्वरे चतुर्विंशतिहोरां यावत् नियन्त्रणकक्षाः स्थापिताः। राष्ट्रियात्पदबलं अन्यानि च बलानि तटीयजनपदेषु साहाय्यार्थं गतवन्त:।

**<u>क्रिकेटिति</u>**

**पुरुषाणां विंशतिप्रतिविंशति एमर्जिंग इति उदीयमान-एशिया-चषक-क्रिकेट्-प्रतिस्पर्धायाम् अवर्गस्य भारतेन ह्यः अल-अमरात-इत्यत्र संयुक्तअरब-अमीरातः सप्तस्तोभैः पराजितः।**

**।।इति वार्ताः।।**